UGNYDS403

न्यायसिद्धान्तमुक्तावली -1

Full Marks : 60

Time – $2\frac{1}{2}$ hours

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम्- **1×10=10**

1. न्यायसिद्धान्तमुक्तावल्याः अपरं नाम किम्?
2. नव्यमते मङ्गलस्य फलं किम्?
3. तमसः दशमद्रव्यत्वं कः अङ्गीकरोति?
4. भ्रमणादिकर्मणां कुत्र अन्तर्भावः?
5. पटस्य असमवायिकारणं किम्?
6. चतुर्थः अन्यथासिद्धः कः?
7. संसर्गाभावः कतिविधः?
8. द्रवत्वं कतिविधम्?
9. जगतः निमित्तकारणं किम् ?
10. जातिबाधकाः कतिविधाः?

अधोलिखितानां पञ्चानां टिप्पणी विधेया - **6×5=30**

11. मङ्गलवादः
12. नवद्रव्याणि
13. ईश्वरसिद्धिः
14. असमवायिकारणम्
15. सामान्यम्
16. द्रव्यादयः पञ्चभावा अनेके समवायिनः।
    सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निगुणक्रियः।।
17. क्षितिर्जलं तथा तेजः पवनो मन एव च।
    परापरत्वमूर्तत्वक्रियावेगाश्रया अमी।।

अधस्तनेषु द्वौ प्रश्नौ समाधेयौ **10×2=20**

18. नूतनजलधरेत्यादि मङ्गलपद्ये समासादिकं प्रदर्श्य तस्य व्याख्यानं कुरुत।
19. षड्विधजातिबाधकान् विमृशत।
20. सामान्यपरिहीनत्वं केषां साधर्म्यम् इति विचारयत।
21. स्वाधीतग्रन्थदिशा इन्द्रियार्थसन्निकर्षान् प्रदर्शयत।

****